इह बोधनं दिनद्वयेन। तं बोधितं कुम्भकर्णम्। सप्तमवासरे बोधनोत्तरं सप्तमवासरे इत्यर्थः। यत्तु बोधनं षष्ठ्यां रात्रौ सप्तम्याञ्चैतद्वध इति तन्न। तदुत्थापने उक्तस्यातिप्रयासस्य रात्रिमात्रेणासम्भवात्। रावणमन्दिरगमनकाले सूर्य्यप्रभया रावणमन्दिरस्यातिभास्वरत्ववर्णनेन मल्लादिना सप्तम्यां युद्धासम्भवात्। इन्द्रजितो दिनत्रयेण वधोऽस्य यामषट्केनेत्यस्यासङ्गतत्वाच्च। एवञ्च भाद्रपूर्णिमायामेतद्वधः।

'जघान लक्ष्मणोऽन्येद्युरतिकायं दशास्यजम्।
बवल्गान्येद्युरिन्द्रारिर्ब्रह्मास्त्रेण भृशं कपीन् ॥
हनूमता समानीतो महौषधमहीधरः।
तस्यानिलस्पर्शवशात् सर्व्व एते समुत्थिताः ॥
अन्येद्युः कपिराट् कुम्भं निकुम्भं वायुजोऽवधीत्।
तस्यां निशि रघुश्रेष्ठो जघान मकरेक्षणम् ॥
मायासीतावधञ्चक्रे शक्रजिद्रणमूर्द्धनि।
तेन खिन्नोऽभवद्राम आश्वस्तो लक्ष्मणेन सः।
त्रयोदशाहे सौमित्रिस्त्रिदिनं योधयन् बली ॥
जघान शक्रजेतारं रामध्यानेन हेतुना ॥'

अन्येद्युः अन्येषु दिवसेषु। अत्रातिकायग्रहणं त्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वोपलक्षणम्। लक्ष्मणग्रहणमङ्गदहनूमतोरप्युपलक्षणम्। एवं षड्भिर्द्दिनैः षष्ठां वधः। पूर्व्वं क्रमेणैव तद्वधोक्तेः। अन्येद्युः सप्तम्याम्। पर्व्वतानयनमष्टम्याम्। अन्येद्युर्नवम्याम्। तस्यां निशि नवमीरात्रौ तदन्ते मायासीतावधः। ततो दशमीचतुर्थयाममारभ्य त्रयोदशीचतुर्थयामपर्य्यन्तमिन्द्रजिद्वधः।

'ततोऽवधीन्मूलबलञ्चतुर्द्दश्यां रघूद्वहः।
दर्शेऽथ निर्य्ययौ राजा योद्धुं रामेण संयुगे ॥
चतुरङ्गबलैः सार्द्धं मन्त्रिभिर्द्दशकन्धरः।
छत्रचामरसंयुक्तः सर्व्वाभरणभूषितः ॥
महारथगतो द्वाराद्दुत्तरान्निर्य्ययौ बहिः।
आगतो रक्षसां राजा त्रस्यन्तो देवकण्टकः ॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः।
तत्र युद्धं समभवद्वानराणाञ्च रक्षसाम् ॥
रामरावणयोश्चैव तथा सौमित्रिणा सह ॥
शक्तिक्षिप्तेन संक्रुद्धः सोऽनुजं प्रति रावणः।
वक्षसा धारयामास सौमित्रिस्तां वियद्गताम्।
तया स बाध्यमानः सन् पपात धरणीतले ॥
हनूमता जीवितोऽभूदौषध्यानयनात् पुनः।
ततः क्रुद्धो महातेजा राघवो राक्षसान्तकः ॥
जघान राक्षसान् सर्व्वान् शरैः कालान्तकोपमैः।
भयात् प्रदुद्राव रणे लङ्कां प्रति निशाचरः ॥
जगद्राममयं पश्यन्निर्व्वेदात् स्वगृहं विशत्।
निकुम्भिलां ततः प्राप्य होमञ्चक्रे जिगीषया ॥
ध्वंसितं वानरैर्म्लेच्छदभिचारात्मकं रिपोः।
पुनरुत्थाय पौलस्त्यो रामेण सह योधितुम् ॥
दिव्यं स्यन्दनमारुह्य राक्षसैर्निर्य्ययौ बहिः ॥
इदं निर्गमनमाश्विनशुक्लप्रतिपदि।
'ततः शतमखो दिव्यं रथं हर्य्यश्वसंयुतम्।
राघवाय स्वहस्तेन प्रेषयामास भक्तिमान् ॥
तन्तु मातलिनानीतमारुह्य रथसत्तमम्।
स्तूयमानः सुरगणैर्युयुधे तेन रक्षसा ॥
ततो युद्धमभूद्घोरं रामराघवयोर्म्महत्।
सप्ताह्निकमहोरात्रं शस्त्रास्त्रैरतिभीषणैरिति।'

ततो मातलिरथागमनदिनोत्तरम्। एवञ्च नवम्यां तद्वधः। तदुक्तं कालिकापुराणे।

'रामस्यानुग्रहार्थं वै रावणस्य वधाय च।
रात्रावेव महादेवी ब्रह्मणा बोधिता पुरा ॥
ततस्तु त्यक्तनिद्रा सा नन्दायामाश्विनेऽसिते।
जगाम नगरीं लङ्कां यत्रासीद्राघवः पुरा ॥'

आगत इति शेषः। इदञ्चागमनं रात्रान्ते तदैव मातलिरथागमनम्।

'तत्र गत्वा महादेवी तदा तौ रामरावणौ।
युद्धेन योजयामास स्वयमन्तर्हितास्बिका ॥
राक्षसानां वानराणां जग्ध्वा सा मांसशोणितम्।
रामरावणयोर्युद्धं सप्ताहं सा न्ययोजयत् ॥
व्यतीते सप्तमे रात्रे नवम्यां रावणं ततः।
रामेण घातयामास महामाया जगन्मयी ॥
यावत्तयोः स्वयं देवी युद्धकेलिमुदैक्षत।
तावत्तु अहोरात्राणि सर्व्वैर्द्देवैः सुपूजिता ॥
निहते रावणे वीरे नवम्यां सकलैः सुरैः।
विशेषपूजा दुर्गायाश्चक्रे लोकपितामहः ॥'

सकलैः सुरैरित्यस्य सहेति शेषः।

'रामरावणबाणैस्तु युद्धचादेस्य भीतिदम्।
तृतीयायान्तु लङ्कायाः पूर्व्वोत्तरदिशि स्थितम् ॥
स्वातिनक्षत्रयुक्तायां भीतं सुरबलं महत्।
शान्त्यर्थं वारयामास देवेन्द्रो वचनाद्धरेः ॥
शान्त्यर्थं भयशान्त्यर्थम्।
'ततस्तु श्रवणे नाथ दशम्यां चण्डिका शुभाम्।
विसृज्य चक्रे शान्त्यर्थं बलनीराजनं हरिः ॥'

रिपुजनितभयशान्त्यर्थमित्यर्थः।

'नीराजितबलः शक्रस्तत्र रामं सलक्ष्मणम्।
सम्भाष्य प्रययौ स्वर्गं सह देवैः शचीपतिः ॥
इति वृत्तं पुरा कल्पे मनोः स्वायम्भुवेऽन्तरे।
पुरा कल्पे यथा वृत्तं प्रतिकल्पं तथैव तु ॥
प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै।'

स्वायम्भुवमन्वन्तररूपे पुरा कल्पे इत्यर्थः। प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थः। जलप्लवसामान्येन तत्रापि कल्पव्यवहारात्।

'प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः।
तथैव जायते युद्धं तथैव त्रिदशागमः ॥
एवं रामसहस्राणि रावणानां तथैव च।
भवितव्यानि भूतानि तेषु देवी प्रवर्त्तते ॥
तां पूजन्ति सुराः सर्व्वे बलं नीराजयन्ति च।
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि ॥
बलनीराजनं राजा कुर्य्याद्द्द बलविवृद्धये ॥' इति।

इयञ्च ब्रह्मबोधिता महादेवी अस्मौ प्रविष्टा सीतैव भगवच्छक्तिरूपेति प्रतिभाति। अतएव ब्रह्मवैवर्त्ते प्रथमेऽंशविभागे। प्रतिकल्पं विष्णोश्चरितं कीदृशमिति नारदप्रश्ने ब्रह्मवाक्यम्।

'स एव भगवान्नूनं प्रतिमन्वन्तरं मुने !।
वधाय दुष्टदैत्यानां भूमिभारहृतां भुवि ॥
कलिद्वापरयोः सन्धौ भविष्यति न संशयः।
प्रतिकल्पं त्विनमेव भविष्यति न संशयः ॥" इति।

सहस्रकृत्वो रामोऽपि भविता ब्रह्मणो दिने इति ब्रह्मवैवर्त्ते प्रथमविभागस्थे राधां प्रति कृष्णवाक्ये। दिने इति जातावेकवचनम्। दिनेष्वित्यर्थः। पूर्व्वं प्रतिमन्वन्तरमित्युक्तेः। प्रतिचतुर्युगं रामाद्यवतार इति तु न युक्तम्। चतुर्व्विंशतितमचतुर्युगे रामावतारस्याष्टाविंशतितमचतुर्युगे कृष्णावतारस्य हरिवंशे पुराणान्तरे च प्रसिद्धत्वादिति दिक्। अग्निवेश्यरामायणमिति प्रसिद्धग्रन्थेषु।

'रामः पञ्चदशे वर्षे षड्वर्षामपि मैथिलीम्।
उपयेमे त्वयोध्यायां द्वादशाब्दानुवास सः ॥
सप्तविंशतिमे वर्षे वनवासमकल्पयत्।
अष्टादश तु वर्षाणि सीतायास्तु तदाभवन् ॥
त्रिरात्रमुदकाहारश्चतुर्थेऽह्नि फलाशनः।
पञ्चमे चित्रकूटे तु रामो वासमकारयत् ॥
अथ त्रयोदशे वर्षे पञ्चवट्यां महामनाः।
रामो विरूपयामास घोरां शूर्पणखां वने ॥
ततो माघे सिताष्टम्यां मुहूर्त्ते वृन्दसंज्ञके।
राघवाभ्यां विना सीतां जहार दशकन्धरः ॥'

माघे शुक्लचतुर्द्दश्यामिति पाठान्तरम्।

'मार्गशुक्लदशम्यान्तु वसन्तीं रावणालये।
सम्पातिर्द्दशमे मासे आचख्यौ वानरेषु ताम् ॥
एकादश्यां महेन्द्राग्रात् पुप्लुवे शतयोजनम्।
तद्रात्रिशेषे सीताया दर्शनं हि हनूमतः ॥
द्वादश्यां शिंशपावृक्षे हनूमान् पर्य्यवस्थितः।
तस्यां निशायां सीतायां विश्वासालापसत्कथाः ॥
अष्टादिभिस्त्रयोदश्यां ततो युद्धमवर्त्तत।
वधो ह्यक्षकुमारस्य वनविध्वंसनं तथा ॥
ब्रह्मास्त्रेण चतुर्द्दश्यां बद्धः शक्रजिता कपिः।
वह्निना पुच्छयुक्तेन लङ्काया दहनं तथा ॥
पौर्णमासीं महेन्द्राद्रौ पुनरागमनं कपेः।
मार्गासितप्रतिपदः पञ्चभिः पथि वासरैः ॥
पुनरागम्य षष्ठेऽह्नि ध्वस्तं मधुवनञ्च तैः।
सप्तम्यां प्रत्यभिज्ञानदानं शुद्धिनिवेदनम् ॥
अष्टम्युत्तरफल्गुन्यां मुहूर्त्ते विजयाभिधे।
मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य तु ॥
वासरे सप्तमेऽम्भोधौ स्कन्धावारनिवेशनम् ॥
पौषशुक्लप्रतिपदस्तृतीया यावदम्बुधिः।
उपस्थानं ससैन्यस्य राघवस्य बभूव ह ॥
विभीषणश्चतुर्थ्यां वै रामेण सह सङ्गतः।
समुद्रतरणार्थाय पञ्चम्यां मन्त्र उद्यमः ॥
प्रायोपवेशनञ्चक्रे रामो दिनचतुष्टयम्।
समुद्रवरलाभश्च सेतूपायप्रकीर्त्तनम् ॥
सेतोर्द्दशम्यामारम्भस्त्रयोदश्यां समापनम्।
चतुर्द्दश्यां सुवेलाग्रे रामः सैन्यं न्यवेशयत् ॥
पौर्णमास्यां द्वितीयान्तं त्रिदिनैः सैन्यतारणम्।
तृतीयाया दशम्यन्तं मन्त्रो गुल्मनिवेशने ॥